# From our Library. Lesson 39 C. The aping monkeys.

| Nouns/ Pronouns | Verbs | Avyayas | Adjectives |
|---|---|---|---|
| शिरस्त्रविक्रीय cap-seller M | | ऊर्ध्वम् up | अनुकरणशीलः - लं- ला imitating |
| अरण्य forest N<br>शिरस्त्र cap N | | पार्श्वे next to. | श्रान्तः - तं - ता tired |
| शिरस् head (शिरसि is the locative सप्तमी ...on the head.) N<br>पाषाणखण्ड stone M<br>उपाय plan M | | | व्यतीतः- तं - ता passed, went by.<br>जागरितः - ता -ता awake<br>चकितचकितः - तं - ता greatly alarmed |
| | | | निजः - जं - जा one's own |

अनुकरणशीलाः वानराः।

आसीत् एकः शिरस्त्रविक्रीयः। माधवः तस्य नाम । एकदा माधवः नगरं अगच्छत्। तत्र सः शिरस्त्राणां क्रेयणम् अकरोत्। तेषां विक्रयार्थं ( to sell )सः ग्रामात् ग्रामम् अभ्रमत्। मार्गे अरण्यम् आसीत्। माधवः भ्रमणेन श्रान्तः अभवत्। श्रमपरिहारार्थं ( to get rid of his tiredness) सः एकस्य वृक्षस्य अधः आसीदत्। शिरस्त्रपेटिकां पार्श्वे अस्थापयत् सः शयनम् अकरोत् च । तदा तस्य शिरसि एकं शिरस्त्रम् आसीत्।

वृक्षे वानराः आसन्। एकः वानरः अधः अवारोहत्। शिरस्त्रपेटिकां कुतूहलात् उदघाटयत्। एकं शिरस्त्रं हस्तेन अधरत्। शिरसि अस्थापयत्। पुनः वृक्षम् आरोहत्।

अन्ये वानराः तत् अपश्यन्। यथा प्रथमः वानरः अकरोत् तथा एव ते अपि अकुर्वन्। समयः व्यतीतः। माधवः जागरितः अभवत्। पार्श्वे अपश्यत्। चकितचकितः अभवत्। पेटिकायाम् एकम् अपि शिरस्त्रं नासीत्। माधवः ऊर्ध्वम् अपश्यत्। तत्र वानराः आसन्। प्रत्येकस्य शिरसि शिरस्त्रम् आसीत्।

सः वानरान् दण्डम् अदर्शयत्। वानराः वृक्षशाखाः अदर्शयन्। माधवः पाषाणखण्डम् अक्षिपत्। वानराः फलानि अक्षिपन्। माधवः अचिन्तयत् , " किं करोमि? वानराः अनुकरणशीलाः ..... यथा अहं करोमि तथा एव ते कुर्वन्ति । एकः एव उपायः अस्ति ।" इति ।

सः निजं शिरस्त्रं भूमौ अक्षिपत्। तदा सर्वे वानराः अपि निजानि शिरस्त्राणि भूमौ अक्षिपन्।

सत्वरं माधवः सर्वाणि शिरस्त्राणि समानयत्। पेटिकायाम् अस्थापयत्। ततः शीघ्रम् अगच्छत्।

***********